## समासाच्च तद्विषयात्। (१०६/२०६१)

तद् इत्यनेन प्रकृत इवार्थो निर्दिश्यते। इवार्थविषयात् समासादपरस्मिन्निवार्थे [1]एव छः प्रत्ययो भवति। काकतालीयम्। अजाकृपाणीयम्। [2]अन्धकवर्तकीयम्। अतर्कितोपनतं [3]चित्रीकरणमुच्यते। तत् कथम्? काकस्यागमनं यादृच्छिकम्, तालस्य पतनं च[4]। तेन [5]तालेन पतता काकस्य वधः कृतः। एवमेव[6] देवदत्तस्य तत्रागमनं, दस्यूनां च उपनिपातः। तैश्च तस्य वधः कृतः। तत्र यो देवदत्तस्य दस्यूनां च समागमः, स काकतालसमागमसदृशः इत्येकः उपमार्थः, अतश्च देवदत्तस्य वधः, स कालतालवधसदृशः इति द्वितीयः उपमार्थः। तत्र [7]प्रथमे समासः, द्वितीये प्रत्ययः। समासश्चायमस्मादेव ज्ञापकात्, न ह्यस्यापरं सक्षणमस्ति। सुप्सुपेति [8]वा समासः। [9]स चैवंविषय एव॥

## शर्करादिभ्योऽण्। (१०७/२०६२)

[10]शर्करा इत्येवमादिभ्यः प्रातिपदिकेभ्यः इवार्थे अण् प्रत्ययो भवति। शर्करा इव [11]शार्करम्। [12]कापालिकम्।

शर्करा। कपालिका। [13]पिष्टिक। पुण्डरीक। [14]शतपत्र। गोलोमन्। गोपुच्छ। [15]नरालि। [16]नकुला। सिकता। शर्करादिः॥

## अङ्गुल्यादिभ्यष्ठक्। (१०८/२०६३)

अङ्गुल्यादिभ्यः इवार्थे ठक् प्रत्ययो भवति। अङ्गुलीव आङ्गुलिकः। [17]भारुजिकः।

अङ्गुलि। [18]भरुज। बभ्रु। वल्गु। [19]मण्डर। मण्डल। शष्कुल[20]। कपि। [21]उदश्वित्। गोणी। [22]उरस्। [23]शिखर। कुलिश। अङ्गुल्यादिः॥

## एकशालायाष्ठजन्यतरस्याम्। (१०९/२०६४)

एकशालाशब्दाद् इवार्थेऽन्यतरस्यां ठच् प्रत्ययो भवति। अन्यतरस्यांग्रहणेनानन्तरः ठक् प्राप्यते। एकशालेव [24]एकशालिकः, [25]ऐकशालिकः॥

---

1. एव नास्ति क. 2. अन्धकवर्तीयम् ह, अलुकवर्तनीयम् क, शक्रार्जुनीयम् ड. 3. इति फलितोऽर्थः ड, नास्ति ह. 4. स्वाभाविकम् इत्यधिकम् क. 5. तालेन नास्ति क. 6. एव नास्ति क. 7. प्रथमः समासार्थः द्वितीयः प्रत्ययार्थः ड.ह. 8. वा नास्ति क. 9. स हि एवं ड. 10. शर्करादिभ्यः फ. 11. शार्करः क. 12. कापालकम् क. 13. कृपाष्टिका ह, कपिष्टिका ड. 14. शतपथ ड. 15. नराचि ग. 16. नकुल ह.ड. 17. भारद्वाजिकः क, दारुलिकः ह. 18. भरद्वाज क, दारुल ह. 19. मण्डुर ड. 20. हरि इत्यधिकम् ह. 21. भरु बल इत्यधिकम् ह. 22. तरस् ह. 23. शिखा ग, नास्ति ह. 24. एकशालिकम् ऐकशालिकम् ड. 25. नास्ति ग.